Gujarathi

## । શ્રી હરિ વાયુ ગુરુભ્યો નમઃ ॥

અજ્ઞાનનાશાય વિજ્ઞાનપૂર્ણાય
સુજ્ઞાનદાત્રે નમસ્તે ગુરો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૧ ॥

આનંદરૂપાય નંદાત્મજ શ્રી
પદાંભોજભાજે નમસ્તે ગુરો ।
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૨ ॥

ઈષ્ટપ્રદાનેન કષ્ટપ્રહાણેન
શિષ્ટસ્તુત શ્રી પદાંભોજ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૩ ॥

ઈડે ભવત્પાદપાથોજમાધ્યાય
ભૂયો પિ ભૂયો ભયાત પાહિ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૪ ॥

ઉગ્રં પિશાચાદિકં દ્રાવયિત્વાશુ
સૌખ્યં જનાનાં કરોષીશ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૫ ॥

ઊર્જત્કૃપાપૂર  પાથોનિધે મંક્ષુ
તુષ્ટોનુગૃહ્ણાસિ ભકતાન વિભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૬ ॥

ઋજૂત્તમ પ્રાણ પાદાર્ચન પ્રાપ્ત
માહાત્મ્યસંપૂર્ણસિદ્ધેશ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૭ ॥

ઋજુસ્વભાવાપ્તભકતેષ્ઠકલ્પદ્રુ
રૂપેશભૂપાદિવંદ્ય પ્રભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૮ ॥

ૠદ્ધંચશસ્તે વિભાતિ પ્રકૃષ્ટં
પ્રપન્નાર્તિહંતર્મહોદાર ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૯ ॥

કલૃપ્તાતિભકતૌઘ કામ્યાર્થદાત
ર્ભવાંભોધિપારંગત પ્રાજ્ઞભો ।
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૦ ॥

એકાંતભકતાય માકાંતપાદાબ્જ
ઉચ્ચાય લોકે નમસ્તે વિભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ

શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૧ ॥

ઐશ્વર્યભૂમન મહાભાગ્યદાયિન
પરેષાં ચ કૃત્યાદિ નાશિન પ્રભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૨ ॥

ઓંકાર વાચ્યાર્થભાવેન ભાવેન
લબ્ધોદયશ્રીશ યોગીશ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૩ ॥

ઔર્વાનલપ્રખ્ય દુર્વાદિ દાવાનલૈઃ
સર્વતંત્ર સ્વતંત્રેશ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૪ ॥

અંભોજ સંભૂત મુખ્યામરારાધ્ય
ભૂનાથભક્તેશ ભાવજ્ઞ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૫ ॥

અસ્તંગતાનેક માયાદિવાદીશ
વિદ્યોતિતાશેષવેદાંત ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૧૬ ॥

કામ્યાર્થદાનાય બદ્ધાદરાશેષ

લોકાય સેવાનુસક્તાય ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૧૭ ॥

ખદ્યોતસારેષુ પ્રત્યર્થિસાર્થેષુ
મધ્યાહ્નમાર્તાંડબિંબાભ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૧૮ ॥

ગર્વિષ્ઠ ગર્વાંબુશોષાર્યમાત્યુગ્ર
નમ્રાંબુધેર્યામિનીનાથ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૧૯ ॥

ઘોરામયધ્વાંત વિધ્વંસનોદ્દામ
દેદીપ્યમાનાર્કબિંબાભ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૨૦ ॥

ડણત્કાર દંડાંક કાષાય વસ્ત્રાં
ક કૌપીન પીનાંક હંસાંક ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૨૧ ॥

ચંડીશ કાંડેશ પાખંડવાક્કાંડ
તામિસ્રમાર્તાંડ પાષંડ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૨૨ ॥

છદ્માણુભાગં ન વિદ્મસ્ત્વદંતઃ
સુસદ્મૈવ પદ્માધવસ્યાસિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૩ ॥

જાડ્યં હિનસ્તિ જ્વરાર્શઃ ક્ષયાદ્યાશુ
તે પાદપદ્માંબુલેશોઽપિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૪ ॥

ઝષધ્વજીયેષ્વલભ્યોરુચેતઃ
સમારૂઢમારૂઢવક્ષોંગ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૫ ॥

ઞાંચાવિહીનાય યાદૃચ્છિક પ્રાપ્ત
તુષ્ટાય સદ્યઃ પ્રપન્નોઽસિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૬ ॥

ટીકારહસ્યાર્થ વિખ્યાપનગ્રંથ
વિસ્તારલોકોપકર્તઃ પ્રભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૭ ॥

ઠંકુવરીણામમેય પ્રભાવો
દ્દરાપાર સંસારતો માં પ્રભો

શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૮ ॥

ડાકિન્યપસ્મારઘોરાદિકોગ્ર
ગ્રહોચ્ચાટનોદગ્રવીરાગ્ર્ય ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૨૯ ॥

ઢક્કાદિકધ્વાન વિદ્રાવિતાનેક
દુર્વાદિગોમાયુસંઘાત ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૦ ॥

ણાત્માદિમાત્રર્ણલક્ષ્યાર્થક શ્રી
પતિધ્યાન સન્નદ્ધધીસિદ્ધ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૧ ॥
તાપત્રય પ્રૌઢબાધાભિભૂતસ્ય
ભકતસ્ય તાપત્રયં હંસિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૨ ॥

સ્થાનત્રય પ્રાપકજ્ઞાનદાતઃ
સ્ત્રિધામાંઘ્રિભક્તિં પ્રયચ્છ પ્રભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૩ ॥

દારિદ્ર્ય દારિદ્ર્ય યોગેન યોગેન

સંપન્નસંપત્તિમાધેહિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૪ ॥

ધાવંતિ તે નામધેચાભિસંકીર્ત્ય
નેનૈનસામાશુ વૃંદાનિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૫ ॥

નાનાવિધાનેક જન્માદિ દુઃખૌઘ
તઃ સાધ્વસં સંહરોદાર ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૬ ॥

પાતા ત્વમેવેતિ માતા ત્વમેવેતિ
મિત્રં ત્વમેવેત્યહં વેદ્મિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૭ ॥

ફાલસ્તુદુર્દૈવવર્ણાવલીકાર્ચ
લોપેટપિ ભકતસ્ય શકતોટસિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૮ ॥

બદ્ધોટસ્મિ સંસારપાશેન તેંટઘ્રીં
વિન્યાટન્યાગતિર્નેત્યવેમિ પ્રભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૩૯ ॥

ભાવે ભજામીહ વાચા વદામિ ત્વ
દીયં પદં દંડવત સ્વામિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૪૦ ॥

માન્યેષુ માન્યોસિ મત્યા ચ ધૃત્યા ચ
મામદ્ય માન્યં કુરુ દ્રાગ વિભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૪૧ ॥

યં કામમાકામયે તં ન ચાપં
તતસ્ત્વં શરણ્યો ભવત્યેમિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૪૨ ॥

રાજાદિવશ્યાદિ કુક્ષિંભરાનેક
ચાતુર્યવિદ્યાસુ મૂઢોટસ્મિ ભો
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૪૩ ॥

લક્ષેષુ તે ભકતવર્ગેષુ કુર્વેક–
લક્ષ્યં કૃપાપાંગલેશસ્ય માં
શ્રી રાઘવેંદ્રાર્ચ શ્રી રાઘવેંદ્રાર્ચ
શ્રી રાઘવેંદ્રાર્ચ પાહિ પ્રભો ॥ ૪૪ ॥

વારાંગનાદ્યૂત ચૌયાન્યદારા–
રતત્વાદ્યવદ્યત્વતો માં પ્રભો

શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૪૫ ॥

શકતોન શક્તિં તવ સ્તોતુમાધ્યાતુ –
મીદૃક્વહં કિં કરોમીશ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૪૬ ॥

ષડ્વૈરિવર્ગં મમારાન્નિરાકુર્વ
મંદો હરેરાંઘ્રિરાગોટસ્તુ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૪૭ ॥

સન્માર્ગસચ્છાસ્ત્ર સત્સંગ સદ્ભક્તિ–
સજ્ઞાન સંપત્તિમાધેહિ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૪૮ ॥

હાસ્યાસ્પદોહં સમાનેષ્વકીર્ત્યા
તવાંઘ્રિં પ્રપન્નોટસ્મિ સંરક્ષભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૪૯ ॥

લક્ષ્મીવિહીનત્વ હેતોઃ સ્વકીયૈઃ
સુદૂરીકૃતોટસ્મ્યદ્ય વાચ્યોટસ્મિ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૫૦ ॥

ક્ષેમંકરસ્ત્વં ભવાંભોધિમજ્જ
જ્જનાનામિતિ ત્વાં પ્રપન્નોસ્મિ ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૫૧ ॥

કૃષ્ણાવધૂતેન ગીતેન માત્રક્ષ
રાઘેન ગાથાસ્તવેનેઢ્ય ભો
શ્રી રાઘવેંદ્રાર્ય શ્રી રાઘવેંદ્રાર્ય
શ્રી રાઘવેંદ્રાર્ય પાહિ પ્રભો ॥ ૫૨ ॥

**ભારતી રમણ મુખ્યપ્રાણાંતર્ગત શ્રી કૃષ્ણાર્પણમસ્તુ**